"द्दिनं भवासरस्तु भभ्रमः" इति सिद्धान्तशिरोमणिः। "इनोदयद्वयान्तरमिति। अर्कोदययोरन्तरं यत् तदर्कसावनं दिनम्। तदेव कुदिनसंज्ञं ज्ञेयम्। अतोऽपि पूर्ववन्मासवर्षादिकल्पना। अत्रार्कग्रहणमुपलक्षणं तेनान्येषामपि ग्रहाणां तदुदयद्वयान्तरं तत्सावनमिति" प्रमि०।

तद्दिवसस्य कार्यविशेषे आदर्त्तव्यतामाह सू०सि०— "सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा। मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृह्यते"। "सूतकं जन्ममरणसम्बन्धि। आदिपदग्राह्यं चिकित्सितचान्द्रायणादि तस्य परिच्छेदो निर्णयः। दिनाधिपमासेश्वरवर्षेश्वराः। तथा—समुच्चये। ग्रहाणां गतिर्मध्यमा। तुकारात् स्फुटगतेर्निरासः तस्याः प्रतिक्षणं वैलक्षण्याद्दिनसम्बन्धस्याभावात्। एतेन स्पष्टगत्या स्पष्टग्रहस्य चालनं निरस्तं स्थूलत्वादिति सूचितम्। सावनमानेन। एवकारादन्यमाननिरासः" प्रमि०। "प्रायश्चित्तं सूतकाद्यं चिकित्सा यज्ञाद्येवं कर्म वारादिकं च। शास्त्रे त्वस्मिन् खेचराणां च चारा विज्ञातव्याः सावनात् भास्करीयात्" श्रीपतिः॥ कुवासरभूमिदिनादयोऽप्यत्र। २ज्योतिषनिषिद्धे दिने च

**कुदृष्टि** स्त्री कुत्सिता दृष्टिः ज्ञानम्। वेदबाह्यतार्किककल्पनायाम्। "या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः" मनुः।

**कुदेह** पु० कुत्सितोदेहोऽस्य। १कुवेरे २कुत्सितदेहयुक्ते त्रि०। कुगतिस० ३कुत्सिते देहे पु०। कुदेहमानाहिविदष्टदृष्टेः" भाग०५।१२।२।

**कुद्दार** पु० कुं पृथ्वीं दारयति दृ—विदारे अण् पृषो०। १कुद्दाले भूमिविदारणास्त्रे २कोविदारवृक्षे अमरटीका।

**कुद्दाल** पु० कुं भूमिं दलति दल—अण् उप०स०पृषो०। १कोविदारे वृक्षे अमरटी० २भूमिदारणास्त्रे (कोदाल) मेदि०। "क्षमामाद्य बिलं तस्यास्य खनन्तु सागरात्मजाः। कुद्दालैर्हृषुकैश्चैव समुद्रं यत्नमास्थिताः" भा०व० १०७अ०। "कुद्दालं दात्रपिटकं प्रकोष्ठं कांस्यभाजनम्" भा०शा० २२८अ०। हस्त्यादि० बहुव्रीहौ एतत्पूर्वस्य पादस्य नान्त्यलोपः कुद्दालपादः। स्वार्थे क। कुद्दालक तत्रार्थे।

**कुद्मल** न० कुड्मल+पृषो०। विकाशोन्मुखे पुष्पमुकुले अमरटी०

**कुद्य** न कुद्—क्यप्। भित्तौ अमरटीका।

**कुद्र** मिथ्योक्तौ इदित् चु०उभ०सक०सेट्। कुन्द्रयति अचुकुन्द्रत्। प्रनिकुन्द्रयति नोपधकरणेनैव इसिद्धौ इदित्करणं स्वरार्थम्।

**कुद्रङ्क** पु० कुत्सितः रङ्कश्चिह्नमस्य पृषो०। मञ्चोपरिस्थे मण्डपे लिका०।

**कुद्रङ्ग** पु० कुत्सितोरङ्गोयत्र पृषो०। मञ्चकोपरिस्थे मण्डपे हारा०

**कुद्रव** पु० कुं भूमिं द्रवति द्रावयति द्रु—अन्तर्भूतण्यर्थे—अच्। कोद्रवे धान्यभेदे (कोदो) भरतः। [पुंस्त्री०।

**कुद्रि** पु० ऋषिभेदे तस्यापत्यं गृष्ट्या० ढञ्। कौद्रेय तदपत्ये

**कुधान्य** न० कुत्सितं धान्यं कुगतिस०। कुत्सिते धान्यभेदे स च सुश्रुते गुणसहितोदर्शितो यथा "कोरदूषकश्यामाकनीवारशान्तनुतुवरकोद्दालकप्रियङ्गुमधूलिकानान्दीमुखकुरुविन्दगवेधुकावरुकतोनपर्णीमुकुन्दकवेणुयवप्रभृतयः कुधान्यविशेषाः"॥ उष्णाः कषायमधुरा रूक्षाः कटुविपाकिनः। श्लेष्मघ्ना बद्धनिष्यन्दा वातपित्तप्रकोपणाः। कषायमधुरास्तेषां शीतपित्तापहाः स्मृताः। कोद्रवश्च सनीवारः श्यामाकश्च सशान्तनुः। कृष्णा रक्ताश्च पीताश्च श्वेताश्चैव प्रियङ्गवः। यथोत्तरं प्रधानाः स्यू रूक्षाः कफहराः स्मृताः। मधूली मधुरा शीता स्निग्धा नान्दीमुखी तथा। विशोषी तत्र भूयिष्ठं वरकः समुकुन्दकः। रूक्षा वेणुयवा ज्ञेया वीर्योष्णाः कटुपाकिनः। बद्धमूत्राः कफहराः कषाया वातकोपनाः"

**कुध्र** पु० कुं पृथिवीं धारयति धृ—मूलविभुजादि० क हृत०। महीध्रे पर्वते हला०।

**कुनक** पुंस्त्री करटे स्त्रियां जातित्वात् ङीष्।

**कुनख** पु० कुत्सितो नखोऽत्र। सुश्रुतोक्ते रोगभेदे (कुनि) तल्लक्षणं तत्रैवोक्तं यथा। "अभिघातात् प्रदुष्टो यो नखो रूक्षोऽसितः खरः। भवेत्तु कुनखं विद्यात् कुलीनमिति संज्ञितम्"। कुनखे विधिरप्येष" सुश्रु०। इव०। कुत्सितनखयुक्ते त्रि०स्त्रियां स्वाङ्गत्वात् वा ङीष्।

**कुनखिन्** त्रि० कुनखो रोगोऽस्त्यस्य इनि। कुनखरोगयुक्ते सच रोगो भुक्तावशिष्टसुवर्णस्तेयरूपजन्मान्तरीय महापातकचिह्नं यथाह विष्णुः "अथ नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुष्ये लक्षणानि भवन्ति कुष्ठ्यतिपातकी, ब्रह्महा यक्ष्मी, सुरापः श्यावदन्तकः, सुवर्णहारी कुनखी गुरुतल्पगो दुश्चर्मा"। "कुनखी श्यावदन्तश्च द्वादशरात्रं चरित्वा तद्धृतनखावुद्धरेयाताम्" विष्णुः। स्त्रियां ङीप्। सच रोगः गर्भावस्थायां मातृदोषभेदाज्जायते तदुक्तं सुश्रुते "दिवास्वपन्त्याः स्वापशीलोऽञ्जनादन्धो रोदनात् विकृतदृष्टिः स्नानानुलेपनात् दुःखशीलस्तैलाभ्यङ्गात् कुष्ठी नखा-